This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

7830.

॥अथसप्तसंस्थाप्रारंभः॥पत्राणि २६

K K S U LIBRARY
RAMTEK
441 106
M-838
Dist Nagpur

Accession No: - ~~7830~~ + M838
नाम :- सप्त संस्था
~~पत्र~~ - 27
समय - संवत 1849

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अथसप्तसंस्थाप्रारंभः॥ ॥
१ इदानींश्रवणाकर्मादिकेषुसप्तावशिष्टेषुप्रथमंतावत्
श्रवणाकर्मोच्यते॥श्रवणाकर्मसर्पबलिंचभु
क्तापिकेचित्कुर्वंति॥युक्तंतूपवासीनैव॥श्राव
ण्यांपौर्णमास्यांस्वस्तिवाचनवृद्धिश्राद्धंचकृत्वा
दिवैवयवानांव्रीहीणांवाप्रस्थमितानांभर्जनेन
धानाःकृत्वायवैर्व्रीहिभिर्वासक्तुभिर्नवंकलशं
प्रपूर्यवैकंकतीदर्वीमपिसंपाद्यतदुभयंनवेशि
क्येनिधायबल्यर्थंप्राच्यांदिशिशुचिदेशंपीरम् १

ह्यव्रीहीश्रुरुपात्रंकपालंचसंपाद्यधानाःसमाअ
द्धूरकृत्वाद्धीआज्येनाक्ताःकृत्वैकपात्रेनिधायपात्रां
तरेअनक्ताअर्द्धीधानानिधायततोसमित्तेऔपा
सनंकृत्वाप्राणानायम्यदेशकालौसंकीर्त्यममपु
त्रपौत्रादीनांचरोगनिवारणसमस्तपापक्षयाद्विद्व
राश्रीपरमेश्वरप्रीत्यर्थंनित्यविधिरूपश्रवणाक
र्मकरिष्ये॥अन्वाधानादिचस्रुषीआज्येनेत्यंतमु
क्त्वाअग्निंचतुर्वारंचरुणाअच्युतंभौमंपुरोडाशेन
अग्निमात्रायाज्येनवाजिदेवतांधानाद्रव्येणशेषेण

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० २

स्विष्टकृतमित्यादिस्त्रुग्ग्रे रुजरतः पूर्वास्तत्तेषु दर्भेषुच
रुस्थालीं प्रोक्षणीपात्रं दर्वीस्रुवौ प्रणीतापात्रमाज्य
पात्रं इध्माबर्हिषि कपालं शूर्पं कृष्णाजिनं शम्यां उलू
खलं मुसलं दृषदमुपलां मेक्षणं पिष्टोद्वपनी वेदः उ
पवेषः मदंती आज्यं एतानि पात्राणि आसाद्यत
तः पूर्णपात्रनिधानांतं कृत्वा चरुपुरोडाशदेवता
नां पंचानां तूष्णीं चतुरश्चतुरो मुष्टीन्निरुप्य तथैव
तूष्णीं प्रोक्षणवघातादि कृत्वा प्रक्षाल्य चरुपुरोडा
शतंडुलान्यथाभागं पृथक्कृत्य दृषदुपले पुरोडा २

शीयान्स्वयं पिष्टीकृत्य कृष्णाजिने प्रस्कंद्य पत्न्या पेषी
यित्वा चर्वर्थमग्नेर्दक्षिणभागे स्थालीं निधाय अग्नेरु
दग्देशे उपवेषाख्यप्रादेशमितयज्ञियकाष्ठेन द्वाव
गारौ पृथक्कृत्य तयोरेकं वायव्ये निरस्याप स्पृष्ट्वाव
शिष्टांगारे कपालं निधाय तदुपर्यपरांगारान्निक्षि
प्य पात्रांतरे पिष्टसेकार्थमपः प्रताप्य पिष्टभर्जनश
रावे क्षालिते ग्नौ प्रताप्य स्वाग्रे निहिते सपवित्रे पिष्टं
निक्षिप्याग्नौ भर्जनं कृत्वा पूर्णपात्रोदकं स्रुवेण पिष्टे
प्रक्षिप्य तप्तोदकेन पिष्टं संमिश्र्य पिंडमश्वशफमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ३ त्रं कूर्माकृतिं कृत्वा कपालादंगारवेदेनापोह्य स्थाल्यां
तंडुलानोप्य कपाले पुरोडाशं निधायाद्भिः श्लक्ष्णी
कृत्य आज्यं संस्कृत्यादीनि चत्वारि हवींषि त्रिः प
र्यग्निकृत्वा पुरोडाशमुल्मुकैः प्रताप्य तत्रैव सुश्रृ
तं श्रपयित्वा नदुपरि सांगारं भस्म निक्षिप्य प्रस्ता
ल्याज्यमुद्वास्यादि स्रुवसंमार्जनानंतरं पुरोडाशो
परिस्थं भस्म वेदेनापोह्य चरुपुरोडाशावभिघार्यो
दगुद्वास्य चरुं बर्हिष्यासाद्य तदुत्तरे पात्रांतरस्थि
तलौकिकाज्ये पुरोडाशं मज्जयेत्स्रुक्काराष्टषष्ठं वाकु ३

र्यात्॥ तदुत्तरत अक्ता धाना अनक्ताश्च आसाद्येध्मा
धानाद्याज्यभागांते अवदानधर्मेण चरुमवदाय॥
अग्नेनयेत्यादिमंत्रैः ऋग्यंते हविः प्रक्षिप्य स्वाहाका
रं पठन्नाहुतिचतुष्टयं जुहुयात्॥ अग्नयइदमित्या
हुतिचतुष्टयेपि त्यागः॥ अग्नेनयेति चतसृणामग
स्त्य ऋषिः अग्निर्देवता त्रिष्टुप्छंदः श्रवणाकर्मप्रधा
नचरुहोमे विनियोगः अग्ने नय सुपथारा· १ अग्ने त्वं
पा· २ अग्ने त्वमस्मद्यु· ३ पाहि नो अग्ने पायुभिः· ४ स
र्वत्राग्नय इदं· ततः सव्येन पाणिना दक्षिणं पाणिमुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०

४ स्तीर्यकृत्वंपुरोडाशमादायहविरभिघार्यपंचावत्ती
तुत्रिः ॐ अच्युतायभौमायस्वाहेतिअपर्यावर्तय
कृत्वा अच्युतायभौमायेदं ततोयस्मिन्नाज्येपुरो
डाशः स्थापितस्तदाज्यंस्रुवेणादाय मानोअग्नइत्य
स्यागस्त्योग्निस्त्रिष्टुप् आज्ययाज्यहोमेविनियोगः
मानोअग्नेवसुजो अग्नयइदं ततसांजल्यावन्येनो
पस्तृतेप्राग्क्ताधानाद्विस्त्रिर्वावापयित्वाभिघार्य
शंनोभवंत्वित्यस्यवसिष्ठोवाजिनस्त्रिष्टुप् श्रवणी
कर्मप्रधानधानाहोमेवि शन्नोभवन्तुवाजिनो ॐ ४

जलिनाकृत्वा वाजिभ्यइदं ततोनभ्यक्ताधानाःपुत्रा
द्यमात्येभ्योदत्वाचरुधानैकदेशातःस्विष्टकृतंकृत्वा
होमशेषंसमाप्यब्राह्मणान्भोजयेत्॥ ॥इतिश्रव
णाकर्मप्रयोगः॥ ॥अथसर्पबलिः॥ श्रवणाकर्मानं
तरमाचम्यसपवित्रःप्राणानायम्यदेशकालौस्मृत्वा
ममभार्यापुत्राप्तदुहितृसमेतस्यभौमान्तरिक्षदि
व्यदिश्यसर्पेभ्यःसंभावितबाधापरिहारद्वाराश्री
परमे० नित्यविधिरूपंसर्पबल्याख्यंकर्मकरिष्य
इतिसंकल्प्यपूर्वंशिक्यस्थापितदर्वीमादायशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० कयस्थापितकलशाहितसक्तुभिस्तामापूर्यगृहीत्वागृ
५ हान्निर्गत्यप्राच्यांदिशिपूर्वपरिगृहीतंदेशमासाद्य
प्रोक्ष्य॥ॐसर्वदेवजनेभ्यःस्वाहेतिमंत्रेणदर्वीस्थ
सक्तुंतत्रप्राङ्मुखोनिक्षिप्य॥सर्पदेवजनेभ्यइदं॥
बलेर्बलिदातुश्चांतराकेनाप्यव्यवधानेनकार्यमा
परिदानात्॥ततःकृतांजलिःॐयेसर्पाःपार्थिवा
यआंतरिक्ष्यायेदिव्यायेदिश्यास्तेभ्यइमंबलिमाहा
र्षंतेभ्यइमंबलिमुपाकरोमीतिमंत्रेणसर्पानुदि ५
श्यनत्वाबलिंप्रदक्षिणीकृत्यपश्चाद्बलेरुपवि

श्य॥ॐसर्पोसिसर्पतांसर्पाणामधिपतिरस्यन्नेन
मनुष्यांस्त्रायसेपूपेनसर्पान्यज्ञेनदेवांस्त्वयिमा
संतंत्वयिसंतःसर्पामाहिंसिषुः॥ध्रुवदेवदत्तंतेप
रिददामीतिमंत्रमुपांशुसकृज्जपित्वाज्येष्ठक्रमेण
नामग्राहंपुत्रादीन्परिदद्यादेवं·ततोध्रुवसावित्रीं
तेपरिददामीत्यप्रत्तदुहितरं॥ततोध्रुवैत्यवतीं स
तेपरिददामीतिभार्यां॥ध्रुवमांकृष्णशर्माणंपरिद
दामीत्यात्मानमंते॥अन्यःकर्ताचेन्मांपरस्थानेय
जमानंनामद्वितीयांतमुच्चरेत्॥ततःप्रतिपदमार

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ६ म्यप्रत्यवरोहणपर्यंतंसायंप्रातःकालेषुतथैवदर्व्या
तैरेवसक्तुभिःशुचिदेशेबलिंहरेत्॥तत्रनमस्कारा
दिपरिदानांतंनकार्यं।अथवाश्रावणप्रतिपदमा
रभ्यअस्मिन्नहनिप्रत्यवरोहणंमार्गशीर्षशुक्लचतु
र्दश्यांपौर्णमास्यांवाक्रियतेतस्मादर्वाचीनदिनानि
ह्रासवृद्धिभ्यांपरिगणय्यतेषुयावंतःसायंप्रातःका
लास्तावतोबलीस्तदैवदद्यात्॥तदाचप्रथमबलिदा
नांतेनमस्कारपरिदानांतंसकृदेवनप्रत्येकं॥अत्र
तदहरेवाखिलबलिदानंमुख्यःपक्षःवृद्धिश्राद्धम ६

मयार्थतंत्रेणैवकार्यमिदंचाद्यप्रयोगेमुख्यं॥इति
सर्पबलिः॥ ॥अथआश्वयुजीकर्म॥आश्विनपौ
र्णमास्यामाश्वयुजीकर्म।कर्तापूर्वेद्युरुपलेपना
दिनागृहंसमीकृत्यालंकृत्यापरेद्युः स्त्रीपुत्रादिसमे
तोभ्यंगादिस्नात्वाप्रातरौपासनंकृत्वाभ्युदयिकंवि
धायप्राणानायम्यदेशकालौस्मृत्वा॥ममस्त्रीपुत्रा
दिसहितस्यन्यूनापेक्षितविषयसंपूर्णतापूर्णानव
सादनसिद्धिद्वाराश्रीपर०र्थंनित्यविधिरूपमाश्वयु
जीकर्मकरिष्यइतिसंकल्प्यान्वाधानादिचक्षुषीआज्ये

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०
७

मेत्संतेत्रप्रधानंपशुपतिंचरुणापृषातकंपृषातक
द्रव्येणशेषेणस्विष्टकृतमित्यादि॰पात्रासादनेचरु
स्थाल्यासहपृषातकस्थाल्यासादनं॰प्रोक्षणंचपू
र्णपात्रनिधानांतेऽग्नेः प्रत्यक्पवित्रवतीशूर्पेपशु
पतयेत्वाजुष्टंनिर्वपामीतिचतुरोमुष्टीश्चर्वर्थेनिरू
प्यतत्सरव्ययातथैवप्रोक्ष्यावघातादिचरुश्रपणांते
आज्यमिश्रंपयःपृषातकाख्यंहविरंतरंकृत्वाज्यंसं
स्कृत्यपृषातकंचरुभ्यांसहाज्यंपर्यग्निकृत्वाज्योद्वा
सनादिआज्यभागांतेसुत्तादिभिरन्वारब्धश्चरुमव ७

दाय॰ ॐ पशुपतयेशिवायशंकरायपृषातकायस्वा
हेतिहुत्वा। पशुपतयेशिवायशंकरायपृषातकायेदं॰
ततोयजमानांजलावन्यउपस्तीर्यस्रुवेणेवपृषातकं
द्विरवदायाभिघार्य॰ ततोयजमानः ॐ ऊनंपूर्यतांपूर्ण
मेमोपसदत्पृषातकायस्वाहेत्यंजलिनैवहुत्वा। पृषात
कायेदं॰ चरुपृषातकशेषात्स्विष्टकृतंहुत्वाहोमशेषं
समाप्ययथाशक्तिब्राह्मणान्भोजयेदिति॥ इत्याश्वयु
जीकर्मप्रयोगः॥ ॥अथाग्रयणं॥ शरदिपौर्णमास्यां
पर्वणिवातदत्वाभिकृत्तिकादिविशाखांतेषुदेवनक्षत्रेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० ८

न्यतमेचंद्रानुकूल्येआग्रयणंकार्यं· प्रातरोपासनंकृत्वा
भ्युदयिकंविधायप्राणानायम्यदेश० ममरोगजरानि
वृत्तिश्रीयशोल्लप्राप्तिद्वाराश्रीपरमेश्वर० निस्यवि०
आग्रयणंकरिष्यइतिसंकल्प्य· अस्मिन्नन्वाहि· च
रुष्वंतेत्रप्रधानंइंद्राग्नीविश्वांदेवान्द्यावापृथिव्यौ
चनूवान्नचरुणाशेषेणस्वि· परिसमूहनादिपूर्णपा
त्रनिधानांतेप्रत्यगग्नेः पवित्रवतिशूर्पेतंडुलांश्चतुर
श्चतुरोमुष्टीन्निरुप्यतत्संख्ययातथैवप्रोक्ष्यावघा
तादिचरुश्रपणांतेआज्यसंस्कारादाज्यभागांते ८

अवदानधर्मेणचरुमवदाय· ॐ सजूर्ऋतुभिः सजु
र्विधाभिः सजुरिंद्राग्निभ्यां· इंद्राग्निभ्यामिदं· सजु· स
जूर्विश्वेभ्योदेवेभ्यस्वाः विश्वेभ्योदेवेभ्यइदं· सजूर्ऋ·
सजूर्द्यावापृथिवीभ्यांस्वाहा। द्यावापृथिवीभ्यामिदं
तिस्रआहुतीर्हुत्वास्विष्टकृतंहुत्वामध्यमहविःशेष
वर्जंकृत्वावशिष्टंपात्रांतरेकृत्वातत्पात्रंसव्येपाणौधृ
त्वा। ॐ प्रजापतयेत्वाग्रहंगृह्णामिममह्यंश्रियैमह्यं
यशसेमह्यमन्नाद्यायेतिमंत्रेणविहाराद्बहिः प्राङ्मु
खोपविष्टोभिमृश्यदक्षिणेनपाणिनाॐ भद्रान्नः श्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० २

यः समनैष्टदेवास्त्वयावसेनसमस्रीमहिला॥सनोम
योभूः पितवाविस्रोहस्रान्नोभवद्विपदेस्रांचतुष्पदंइति
मंत्रेणप्राश्यहिराचम्यतत्रैवोपतिष्ठः॥ॐअमोसि
प्राणतदृतंब्रवीम्यमासिसर्वांवसिप्रविष्टः॥समेज
रांरोगमपनुद्यशरीरादमामएधिमामृथासइंद्रेति
मंत्रेणात्मनोनाभिमालभेत॥ततःपत्नीमध्यमहविः
शेषममंत्रकंप्राश्नीयात्॥ततोहोमशेषंसमाप्यय
थाशक्तिब्राह्मणान्भोजयेदिति॥इदमाग्रयणंयदा
श्वयुज्यांपौर्णमास्यांक्रियतेतदैककालत्वाराश्वयुजी २

॥कर्मणासमानतंत्रता भवति॥तत्राश्वयुजीकर्मप्रधा
नहोमंकृत्वाग्रयणप्रधानहोमः॥ह्युयोश्चर्वोरुत्तराद्वैदे
कंस्विष्टकृदित्यादिज्ञेयं॥यवाग्रयणंनकार्यं॥कृताकृ
तत्वात्॥स्थामाकेस्तुप्रस्तरंकुर्यान्नाग्रयणं॥शास्त्रां
तरेदृष्टत्वात्॥इदंचाग्रायणंमकृत्वानवान्नभक्षणस्य
निषिद्धत्वाद्दुर्भिक्षेजीर्णधान्यपत्नाभेनवधान्यभक्षण
विकारार्थंमलमासेपिकार्यं॥अनापदितुशुद्धएव॥आ
ग्रयणाकरणेप्रायश्चित्तमुक्तंकारिकायां॥अकृताग्रय
णोश्रीयान्नवान्नंयदिवैततः॥वैश्वानरायकर्त्तव्यश्चरुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० पूर्णाहुतिस्त्रुवेति॥ ॥इत्याग्रयणप्रयोगः॥ ॥
१० अथप्रत्यवरोहणं॥ तच्च मार्गशीर्ष्यां पौर्णमास्यां
चतुर्दश्यां कार्यं॥ कर्त्ता निवेशनमलंकृत्य॥ फलर
हितधान्यतृणनिर्मितं शयनार्थं कटं संपाद्य नां
दीश्राद्धं कृत्वास्तमिते औपासनं कृत्वा देशकालौ सं
कीर्त्य मम स्त्रीपुत्रादिसहितस्य जलस्थलज्वरसर्प
बाधानिवृत्त्यभयहेमंतसौमनस्यसिद्धिद्वारा श्री
परमेश्वर· नित्यविधिरूपं प्रत्यवरोहणाख्यं कर्म
करिष्ये॥ इति संकल्प्य॥ अस्मिन्नन्वाहिते· चतुरो १०

आज्येनेत्यंते त्र प्रधानं द्विः श्वेतं पायसेनात्र स्विष्ट
कृद्वर्जं इध्मसंनहनेन रुद्रमित्यादि सद्योयक्ष्य इत्यं
तमुक्त्वा॥ परिसमूहनादि पूर्णपात्रनिधानांतेष्टो
व्रीहिमुष्टिं तूष्णीं निरुप्य तथैव प्रोक्ष्यावघातादि प
यसि चरुं श्रपणाद्याज्यभागांते स्रुतादिभिरन्वार
ब्धो वदानधर्मेणावदाय॥ ॐ अप श्वेत पदा जहि पू
र्वेण चापरेण च॥ सप्त च वारुणीरिमाः सर्वाश्च राज
बांधवीः स्वाहा॥ श्वेतायेदं॥ न वै श्वेतस्याध्याचारे रि
जघान किंचन॥ श्वेताय वैदार्वायन नमः स्वाहा॥ श्वेता०

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०
११ ङ्गपायसाकुतीर्कृत्वा॥ ततः ॐ अभयंनःप्राजापत्ये
भ्योभूयादित्यग्निमीक्षमाणोजपित्वा॥ ॐ शिवो
नःसुमनाभवेत्यकृत्काहेमंतेतिसवुध्यंतंमनसा
स्मरेत्। ततःपूर्वनिर्मितंकुरंअग्नेःपश्चादास्तीर्य
स्त्रीपुत्रादिसहितस्तस्मिन्नुपविश्य। स्योनामेधा
तिथिर्भूमिर्गायत्री। जपेविनियोगः॥ ॐ स्योनापृ
थिवि० इतिजपित्वाप्राकुशिराउदङ्मुखोदक्षिण
पार्श्वेनशयीत·गृहिणोनंतरंज्येष्ठक्रमेणतथैव
शयीरन्। ततउत्थायोपविश्यप्राङ्मुखाःसर्वे·अ ११

तोदेवामेधातिथिर्विष्णुर्गायत्री। अतोदेवाम्नयृचं
त्रिर्जपित्वाशयीतोत्थायोपविश्यदक्षिणामुखाः
अतोदेवाअवंतुनइतिपादंसकृज्जपित्वातथैवश
यीतोत्थायोपविश्यप्रत्यङ्मुखाःयतोविष्णुर्विच
क्रमइतिद्वितीयंपादंजपित्वातथैवशयीतोत्थायो
दङ्मुखाःउपविश्यपृथिव्याःसप्तधामभिरितितृ
तीयंपादंजपेयुः। ततस्त्रिष्टकुछंदईध्मरज्जुप्रहर
णादिकर्मशेषंसमाप्यततःसर्वेयथाशय्यंशापी
तोत्थायोदितेसूर्येकृतनित्यक्रियाःसंगप्यसौर्या

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० सं० भि स्वस्त्ययनानि च जपेयुः॥ तानि च उ दुत्यमितित्र
१२ योदशार्चं नचचमेवैतज्जप्यमिति कारिकायां चि
त्रं देवानां ६ नमो मित्रस्य १२ सूर्यो नो दिव० ५ आ नो
भद्राः० १० स्वस्ति नो मिमीतां ५ परावतो ये १० सर्वे
षां जपे वि० एतानि जपेयुः॥ ततो यथाशक्ति ब्राह्म
णान्भोजयित्वा तैः स्वस्त्ययनं वाचयेदिति संक्षेपः॥
इदमपि कर्म केचिद्भुक्त्वा कुर्वंति॥ युक्तं तु पवित्रक्षे
पणांतमुपवासी कृत्वा भुक्त्वा शयीतेति॥ ॥इति
प्रत्यवरोहणं॥ अथ खंड पर्वणि केवलपिंडपितृ १२

यज्ञः॥ ॥स चानाहिताग्निनापि कार्यः॥ एवमना
हिताग्निर्नित्ये श्रपयित्वातिप्रणीय जुहुयादिति
सूत्रात्॥ नित्ये औपासनाग्नावित्यर्थः॥ तस्य चाय
माहिताग्नितो विशेषः॥ हविः श्रपणं कृत्वातिप्रण
यनं कर्तव्यं॥ ततोतिप्रणीतस्योपसमाधानं परिस्त
रणं च कृत्वा ततो वाग तिप्रणीतादित्यादि समानं॥
यस्मिन्नहोरात्रे पर्वप्रतिपदोः संधिः स्तत्रापराह्णे
यागदिने तत्पूर्वदिने वा पिंडपितृयज्ञः कार्यः अहो
रात्रसंधौ तिथिसंधौ तु यागपूर्वदिन एवेति वृत्तिकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

13

सं० सं० १२ त्॥ उक्तापराह्णे औपासनाग्निं प्रज्वाल्यशुचिः प्रा
णानायम्यदेशकालौ पितृतृप्तिद्वाराश्रीपरमे
पिंडपितृयज्ञं करिष्य इति संकल्याग्नेयाभिमुखो
ग्निं ध्यात्वाग्नेराग्नेयीं दिशामारभ्याप्रदक्षिणमेव
परिसमुह्याग्नेराग्रकैर्दर्भैः परिस्तीर्याग्नेरीशान्यां
वायव्यांवाग्नेयाग्रकान्दर्भानास्तीर्य तथैव पर्युक्ष्या
स्तीर्णेषु दर्भेषु एकैकशः पात्राण्यासादयेत्॥ चरु
स्थालीशूर्पस्योलूखलमुसलस्रुवश्रुवकृष्णाजि
नसकृदाछिन्नेध्ममेक्षणकमंडलुंचेतियथायो १२

ग्यंन्यक्बिलान्याग्नेयसंस्थान्यासद्योत्ता नानिक
लाकमंडलुजलेनप्रोक्ष्य चरुस्थालींशूर्पंचादाया
ग्नेर्दक्षिणतंव्रीहिमछकटंदक्षिणतआरुह्यशूर्पे
निहितांस्थालींव्रीहिभिरापूर्ययथास्थाली मुखो
परिस्थाः शूर्पेपतंतितथानिमृज्यस्थाली मुखप्र
देशातःपतिता न्व्रीहीन्वाकटे प्रास्याग्नेः पश्चिमतोदे
शेवायव्यग्रीवास्तीर्णे कृष्णाजिनउलूखलंनिधाय
तत्रस्थालीस्थान्व्रीहीन्निधायाग्नेयाभिमुख्यातिष्ठं
त्यापत्न्यावघातितान्सकृत्सुलीकृतानविविच्यसक

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० सं० स्वक्षालितान्जीवतंडुलान्श्रपयित्वाचरुमनुद्वास्ये
१४ वाग्नेरेकंप्रदीप्तमुल्मुकंगृहीत्वाग्नेराग्नेय्यांदिशिक्षि
तेष्वपिस्थंडिले॥येरूपाणिप्रतिमुंचमानाअसुराः
संतःस्वधयाचरंति॥परापुरोनिपुरोयेभरंत्यग्नि
ष्टाल्लोकात्प्रणुदात्वस्मादिति·निधायपूर्ववत्परिस
मूनादिकृत्वाऔपासनातिप्रणीतयोरंतरास्थ्येन
सव्योत्तरपाणिद्वयगृहीतेनकुशमूलेनवाग्नेयसंस्थ
माग्नेयाभिमुखअपहताअसुरारक्षांसिवेदिषदइति
लेखामुल्लिख्यतीमभ्युक्ष्यसकृदाच्छिन्नबर्हिषाछाद्य १४

अवायांविलापितमाज्यमासिच्याग्नेर्दीक्षणतःकुशो
घासाद्यस्रुवंसंमृज्यतेनैवप्रोवाज्याच्चरुमभिघार्यो
दगुद्वास्योपासनाग्नेःपश्चिमतोदर्भेष्वासाद्यांजनाभ्यं
जनकशिपूपबर्हणानिचदक्षिणतोनिधायाप्रदक्षिण
मलंकृत्वप्राचीनावीतीध्ममभिघारितंपितृतीर्थेनतू
ष्णीमग्नावाधायस्रुवेणाज्यमादायमेक्षणमुपस्तीर्येत
धृतंचरुंद्विधाविभज्योत्तरभागमध्यात्पूर्वार्धाच्चांगुष्ठ
पर्वमात्रंहविरवदायपंचावत्तीचेत्पश्चार्धादप्यवदायह
विरवत्तंचाभिघार्यहृदिसव्यंनिधाय·सोमायपितृम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०सं० तेस्वधानमइतिअग्नेर्दक्षिणेभागेपराचीनपाणिना
१५ हुत्वासोमायपितृमतइदं॰पुनर्दक्षिणभागस्थच
रोःपूर्ववदवदायाग्नयेकव्यवाहनायस्वधानमइ
तिअग्नेरुत्तरभागेद्वितीयाहुत्वाअग्नयेकव्यवाह
नायेदं॰प्राचीनावीतिनैवतूष्णीन्युब्जंमेक्षणमग्ना
वनुप्रहृत्यापस्पृष्ट्वा॰स्वधानमःशब्दस्थानेस्वाहा
कारपक्षश्चेदुपवीतिनैवमेक्षणानुप्रहरणांतं॰सोमा
य॰स्वाहाअग्नयेकव्य॰स्वाहेतिहुत्वेतिविशेषःततः
प्राचीनावीतीपूर्वहृत्तरेखायांकमंडलुजलंपितृती १५

र्थेनशुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपिता
महाइतिनिनयेत्॥ततोहुतशेषेणचरुणाग्रीवा
ज्येनत्रीन्पिंडान्हृत्वातस्यांरेखायांपराचीनपा
णिःपितृतीर्थेनतानाग्नेयापवर्गंपित्रादिभ्योदद्या
त्॥तद्यथाएतत्तेमुकशर्मन्गोत्रयेचत्वामत्रानुते
भ्यश्चेतिपित्रेएवंपितामहप्रपितामहयोरपि॥
ततोत्रपितरोमादयध्वंयथाभागमावृषायध्व
मितिसहृत्सिंडानत्नुमंत्र्यसव्येनपार्श्वेनव्यावृत्यो
दङ्मुखोभूत्वायथाशक्तिप्राणान्नियम्याभ्याव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ सं॰
१६

स्वामी मदंत पितरो यथाभागमावृषायीषतेति पुन
स्तानतुमंत्र्य चरुंत्रोषमुपवीत्यव घ्रायद्विराचम्या
प्राचीनावीती शुंधंतामित्याद्येस्त्रिभिः कें मंडलुजलं
निनीयामुकशर्मन्नभ्यं क्ष्वेति त्रिषु भ्यंजनं तैलं घृतं
वादर्भेण दत्वामुकशर्मन्नंक्ष्वेति तथैवांजनं दद्यार
थेतद्वः पितरो वासो मा नो तोन्यत्पितरो युङ्ध्वमिति
प्रति पिंडं मंत्रावृत्त्या नववासो दशां पंचाशद्वर्षाधि
कवयाश्चेः स्वप्रकोष्टहृदयान्यतरलोमवा दत्वाकृ
त्रिघूपबर्हणेनि वेद्य सव्योत्तराभ्यां पाणिभ्यां कृतां १६

जलिराग्नेय्यभिमुखः पिंडानुपतिष्ठेत मंत्रैः॥ यथा नमो
वः पितर इषे॰ इह संतस्याम॥ मनोन्वाहुवामहे तिच
तिसृभिः॥ अथैनान्प्रवाहयेत् परेतन॰ नियच्छतेति
मंत्रेण पिंडानाग्ने॥ भिमुखं सकृदुत्तानेन हस्तेन चालये
त्॥ तत औपासनांतिकं गच्छेत्॥ अम्नेतमद्येति॥ ततो
यदंतरिक्षमिति मंत्रं गार्हपत्यपदरहितं पठेत्॥ ततो वी
रं मे दत्त पितर इति मध्यमं पिंडमादाय सुपुत्रप्राप्त्येप
त्न्यै प्राशयेत्॥ आधत्त पितर इति मंत्रेण॰ इतरौ पिंडा
वप्सु वा प्रणीते वा प्रक्षिपेत्॥ आसादितानां द्वादशपा

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ सं॰ त्राणां मध्ये सकृदाछिन्नबर्हिरिध्ममेक्षणानां विनि
१७ युक्तत्वात् ॥ अवशिष्टानि यानि नवतेषां द्वंद्वशउ
त्सर्गः ॥ अवशिष्टमेकं तृणेन सहोत्सृजेत् ॥ ततोप
वीती परिस्तरणानि विसृजेत् ॥ पूर्ववत्परिसमूह
नोक्षणे कृत्वाग्निं संपूज्य कर्मेश्वरार्पणं कुर्यादिति
॥ इति केवलः पिंडपितृयज्ञः ॥ ॥ अथाखंडपर्व
णि व्यतिषंगेण श्राद्धं कर्तव्यं ॥ ॥ व्यतिषंगो नामो
भयोः सहानुष्ठानं ॥ अथ पिंडपितृयज्ञव्यतिषंगप्र
योगः ॥ देशकालौ॰ प्राचीनावीती दक्षिणाभिमुखो १७

ऽस्मत्पित्रादित्रयाणां सपत्नीकानां तथा मातामहा
दित्रयाणां सपत्नीकानां नामगोत्राणां वस्वादिरूपा
णां च पार्वणश्राद्धं पिंडपितृयज्ञं च व्यतिषंगेण क
रिष्य इति सं॰ तिलोदकादिक्षणां तं कृत्वा विप्रान्संनि
धायाग्निं ध्यात्वा परिसमूहनादि इध्माधानान्तं कृतं
कशिपूपबर्हणासादनान्तं कृत्वा ब्राह्मणपद्धौचादि
भस्ममर्यादाकरणोत्तरपाणिशोधनान्तं कृत्वा ब्राह्म
णाननुज्ञाप्य क्रियतामिति तैरुक्ते तत इध्मा॰ धाना
ध्यामेक्षणानुप्रहरणान्तं यज्ञं कृत्वाप उपस्पृश्य ध्रौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

18

सं०सं० वाज्येनपात्राभिघारणपरिवेषणांतंकृत्वाग्नौकरण
१८ शेषमन्नंपितृपात्रेषुदत्वान्नदानाद्युत्तरापोशानांते
भुक्तशेषात्सर्वस्मादुद्धृतान्नेचरुस्थालीस्थान्नेन
धौवाज्येचपिंडार्थंसंमिश्र्यअतिप्रणीतोपासनयो
रंतराळेपूर्वास्तत्तेषुदर्भेषुप्राचीनावीतीश्रुंधंतांपि
तरइत्यारभ्यपिंडदानादिपरेतननेतिमंत्रेणपिंड
चालनांतेअग्नेतमद्येत्यग्निंचोपस्थायपत्न्यैमध्य
मोपिंडोप्राशयित्वापिंडान्विसृज्यपात्रोत्सर्गंकृत्वा १८
श्राद्धशेषंसमापयेत्॥ ॥इतिपिंडपितृयज्ञव्यतिषंग

अथाष्टका॥ ॥मार्गशीर्षादिचतुर्षुअमांतेषुमासेषुकृ
ष्णपक्षेसप्तम्यादिव्यहसाध्यमष्टकाश्राद्धंकार्यं॥अ
शक्तौमाघमसएवकुर्यात्॥अथपूर्वेद्युश्राद्धं॥सप्त
म्यांप्रातर्होमानंतरंतिथ्यादिकंसंकीर्त्यदर्शवत्संप
त्नीकवर्गद्वयमुद्दिश्यनित्यविधिरूपमष्टकाश्राद्धं
कर्तुकामःपूर्वेद्युःश्राद्धंकरिष्यइतिसंकल्प्य॥ब्राह्म
णनिमंत्रणादिकृत्वाविभाव्संनिधायाग्निसमिंधना
दिपरिषेचनांतंकृत्वास्थालीत्रयंशूर्पादीनिचपात्राणि
पिंडपितृयज्ञवदासाद्यस्थालीषुव्रीहिपूरणादिप्रक्षा

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०सं० १९ ला्नांतेश्रुद्धोदनंतिलमिश्रोदनं पायसंच श्रपयित्वा
अतिप्रणयनादिध्रुवायामाज्यनिषेचनांतेचरुत्रयं
क्रमेणाभिघार्योदगुद्वास्याग्नेः पश्चिमतो दक्षिणसं
स्थंक्रमेणासाद्यतद्दक्षिणतोभ्यंजनरंजनकशिपूपब
र्हणानिनिधायपक्षोवोदिकेरश्रुध्यंतंकृत्वाचरुपा
त्रांतरेपृथक् २ उद्धृत्यघृताक्तंकृत्वाप्राचीनावीतीत्य
ग्नौकरिष्यइतितानुज्ञाप्यालंकृत्याग्नाविध्माधाय
ध्रौवाज्येनमेक्षणमुपस्तीर्यश्रुद्धोदनमध्याद्दंगुष्ठप
र्वमात्रंमेक्षणेवदायपूर्वार्द्धाच्चतथैवावदायतिलमि १९

श्रोदनात्पायसाच्चतथैवदायस्थालीत्रयेपृथक् २ अ
भिघार्यावत्तंसकृदभिघार्य। उदीरतामित्यष्टर्चस्यशं
खः पितरस्त्रिष्टुप्। पूर्वेद्युर्होमेविनियोगः॥ ॐ उदीर
तामवर· हवेषुस्वधानमइतिमेक्षणेनकृत्वा॥ पितृभ्य
इदं॥ सर्वत्रसागः॥ पुनश्चरुत्रयात्पूर्ववदवदाय॥ ॐ
इदंपितृभ्यो· २ आहंपितॄन् ३ बर्हिषदः पितरः· ४ उप
हूताः पितरः ५ आच्याजानुदक्षिणतः· ६ आसीनासो
अरु· ७ येनः पूर्वेपितरः· ८ एतैरपिस्वधानमोंतैः सम
कृतीरग्नौकरणस्थानेपूर्ववद्धुत्वायज्ञोपवीतीमेक्षणम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०सं० नात्वनुप्रहृत्याप स्पृष्ट्वा प्राचीनावीती कृतशिष्टचरुत्रय
२० परिवेषणादिसंपन्नवचनांतं कृत्वा चरुत्रयशेषं पिं
डार्थाद्धृतान्नेषु निक्षिप्य शेषं निवेदनादि विप्रविसर्ज
नांतं दर्शवत् कृत्वा तद्दहरे वसपत्नीकवर्गद्वयस्याति
ल तर्पणं कृत्वा पार्वणवन्नियमेन दिवसं शेषं नयेत्॥
इति सप्तमीश्राद्धप्रयोगः॥ ॥अथाष्टमीश्राद्धप्रयोगः
॥अष्टम्यां प्रातर्होमानंतरं देशकालौ॥ प्राचीनावीती द
र्शवत्सपत्नीकवर्गद्वयमुद्दिश्य नित्यविधिरूपं अष्टका
श्राद्धं०॥ इति संक० क्षणदानांतं कृत्वाग्निं प्रज्वाल्य देश २०

का० अष्टकांगहोमं क० चक्षुषी आज्येनेत्यंतेत्र प्रधानं अ
ग्निमग्निं ग्रीष्महेमंतवर्षाशरत्संवत्सराहोरात्रान् पृथि
व्यंतरिक्षद्युदिकू दिशाप्रतिदिशा उद्दिशा पो विद्युत् आ
पो मरीचीधातारं समुद्रं भूतं भविष्यत् ब्रह्माणि आदित्या
वसु विश्वेदेवा रुद्र मरुत्प्रजापतीन् परमेष्ठिनं चरुणा
शेषेण स्वि० पूर्णपात्रनिधानांते पवित्रवति शूर्पे अग्नेः
प्रत्यक् निधाय अष्टाविंशति मुष्टीन् तूष्णीं निरुप्य तत्संख्य
या प्रोक्ष्यावहननाद्याज्यभागांते अवदानधर्मेणावदाय
॥अग्नेनयेति मंत्रद्वयस्यागस्त्योग्निस्त्रि०॥ अष्टकाहोमे०॥

(५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० स०

२१

अग्नेनयसु० १ अग्नेत्वंपारया० २ मंत्रद्वयेपिअग्नयइ
दं॥ ग्रीष्मोहेमंतऋतवः शिवानोवर्षाः शिवाअभयाः
शरन्नः॥ संवत्सरोधिपतिः प्राणदोनोहोरात्रेकृणुतां
दीर्घमायुस्त्वा०॥ ग्रीष्महेमंतवर्षाः शरत्संवत्सराहोरा
त्रेभ्यइदं० शांतापृथिवी० पृथिव्यंतरिक्षद्युदिक्प्रदि
गुद्दिगापोविद्युभ्यइदं० आपोमरीचीः प्रवहंतुनोधि
योधातासमुद्रोवहंतुपापं॥ भुतंभविष्यदभयंविश्वम
स्तुमेब्रह्माधिगुप्तस्त्वाराक्षराणिस्वा०॥ अग्निमरीचिधा
तृसमुद्रभूतभविष्यद्ब्रह्मभ्यइदं० विश्वआदित्यावस २१

वश्वदेवारुद्रागोप्तारोमरुतः सदंतु॥ ऊर्जंप्रजाममृतं
पिन्वमानः प्रजापतिर्मथिपरमेष्ठीदधातुस्त्वा० आदित्य
वसुविश्वेदेवरुद्रमरुत्प्रजापतिभ्यइदं० प्रजापतेहिर
ण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ अष्टकाहो० प्रजापते० प्रजा
पतयइदं॥ एवंसप्ताहुतीर्हुत्वास्विष्टकृदादिहोमशेषं
समाप्य॥ ब्राह्मणपक्षोच्चादिकरणध्यंतेभोजनान्ताहु
त्यप्राचीनावीतीविप्रपाणिंपर्युक्ष्यदक्षिणाग्रान्दर्भाना
स्तीर्यमेक्षणेउपस्तरणादिविधिनावदायसोमायेत्यादि
मंत्राभ्यामाहुतिद्वयंहुत्वा॥ एवंसर्वत्रजुहुयात्॥ कृता

22

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०सं० न्नंपात्रेषुनिधायाचम्योपविष्टेषुअन्नंपरिविष्यदर्शी
२२ वस्युक्त्वापिंडदानकालविप्रसमीपेपूर्ववत्पूष्ठिमतःकृ
तेद्वेरेखेद्वयंवर्हिरास्तीर्यभोजनार्थादन्नादुद्धृत्यतेनैवनै
वदर्शीवसिंडदानादिविसर्जनांतमस्थूपस्थानवर्जश्रा
द्धशेषंदर्शवत्समापयेत्॥तदहरेवसपत्नीकवर्गद्वय
स्यतिलतर्पणंकुर्यादिति॥अत्राष्टम्यांकामकालावि
तिशेषः॥ ॥इत्यष्टका॥ अथान्वष्टका॥दे०शा०का०॥
प्राचीनावीतीदक्षिणामुखोजान्वाच्यपितृवर्गमातृ
वर्गमातामहवर्गसपत्नीकंषष्ठ्यंतंनित्यविधिरूपंअ २२

न्वष्टक्यश्राद्धंपिंडपितृयज्ञव्यतिषिक्तपार्वणविधाने
नान्नेहविषाद्यकरिष्ये॥इतिसंकल्प्यदर्शवन्निमंत्रणां
तंकृत्वादक्षिणाप्रवणेदेशेकृतेस्थंडिलेऔपासनाग्निंवि
धिवत्प्रतिष्ठाप्यपरिसमुह्यदक्षिणाग्रेर्दर्भैःस्तृवारंअग्र
दक्षिणंपरिस्तीर्यदर्भेषुपात्रासादनंचरुस्थालीत्रयंशू
र्पोलूखलादयःपिंडपितृयज्ञवदासाद्यत्रिषुस्थालीषुतं
डुलपूरणादिविनज्यप्रक्षालनादिस्तुद्धोदनंतिलमिश्रौ
दनंपायसंचश्रपयित्वाकिंचिदोदनाग्रद्रवंमंडाख्यं
पात्रांतरेणादायसंभृत्याग्निमतिप्रणीयपूर्ववत्सरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०सं० स्तीर्यापहता इतिस्येन रेखात्रयंपश्चिमापवर्गंमुल्लि
२३ ख्यप्रत्येकमभ्युक्ष्येकेनसकृदाछिन्नेनावस्तीर्यध्रु
वायामाज्यंकृत्वादक्षिणतआसाद्यचरुत्रयंस्रुवेणा
भिघार्योदगुद्वास्याग्नेःपश्चिमतःक्रमेणदक्षिणसंस्थ
मासाद्यदधिमिश्रमधुमिश्रयवपिष्टंचपात्रद्वयेकृ
त्वौपासनेधिश्रित्याभिघार्योदगुद्वास्यपायसादक्षिण
तआद्याभ्यंजनादीनिदक्षिणतआसाद्यविप्रपादप्र
क्षालनांतंकृत्वार्घ्यासादनकालेनवपात्राण्यासादये
त्॥मात्रादिद्विखेबकुखेवातत्संख्याआसाद्यानुमंत्र २३

णादिकृत्वातिलोसीतिमंत्रेपिलोसीतिमंत्रेपितृरा
दस्थानेमातृमातामहादित्रा द्वप्रक्षेपः॥दर्शवदर्घ्यंद
त्वाकरस्थध्यंतेनचरुत्रयाद्दधिमंथाच्चपात्रचतुष्टयो
क्रमेणहविःपृथगुद्धृत्यघृताक्तंकृत्वाग्नौकरिष्ये क्रिय
तामितितैरुक्तेउपस्तृतेमेक्षणेक्रमेणचतुर्भ्योपिद्वि
र्द्विरवदायहवींष्यवत्तंचाभिघार्यांकुतिद्वयंपूर्ववद्धुत्वा
मेक्षणानुप्रहरणादिसंपन्नवचनांतेपिंडार्थोद्धृतत्र्या
द्वीयसर्वान्नेषुहविश्चतुष्टयंमधुमंथांश्चनिक्षिप्यशेष
निवेद्यउत्तरापोशानेकृतेपूर्वास्तृतेषुबर्हिषुत्रांधंतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ सं॰ मितिवर्गत्रयस्यसतिलकमंडलुजलं निनीय॥ आत्म
२४ नोभिमुखासीनाज्ज्ञानमुद्रा निरायुधाः॥ वसवः पि
तरोज्ञेयारुद्रास्तत्रपितामहाः॥ पितुः पितामहाः प्रो
क्ता दित्याबर्हिषिस्थिताः॥ इति पितॄनूध्यात्वाद्रामल
कप्रमाणानूयधुसर्पिस्तिलयुतान्नवपिंडा प्रोवाज्ये
नाभिघार्य एतत्तइत्यादिना यथालिंगं वर्गत्रयस्यद
द्यात्। स्त्रीपिंडेषुपूर्वसंभृतमंडं निषिच्याग्न्युपस्थानं
तं कृत्वा वीरं मेदत्तपितर इति त्रिरावृत्त्या पितॄनावाह्न
हे नवर्गत्रयं प्रत्येकं प्रार्थ्य मध्यमपिंडत्रयं पत्नीप्राश्ना २४

यित्वा पिंडोद्वासनादि दर्शोक्तं त्वातरह रेवर्गत्रयस्य
तिलतर्पणं कुर्यात्॥ मातृद्विले पिंडदानेस्मन्मातरोग
त्रे यज्ञदेश्री देवसुरूपे येचयुवामत्रानुइति अस्म
न्मातृभ्यां गोत्राभ्यां यज्ञदाश्रीदाभ्यां वसुरूपाभ्यांस्व
धानमोनमः अभ्यंजनेस्मन्मातरौ अभ्यंजाथामिस्वं
जनेअस्मन्मातरौ अंजाथामिति द्विवारं एतद्वः पितृ
रोवासो इत्यादिना पितॄनावाह्नहेन मंत्रावृत्त्या वासोद
द्यात्॥ एवं पितामही प्रपितामही द्विलेपि॥ मातृबकुले
स्मन्मातरः येचयुष्मानत्रानु अभ्यंजनेस्मन्मातरः अ

२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०सं० ण्यइ्ध्वं॥अंजनेस्मन्मातरोइ्ध्वं·वासोदानेएतद्वो
२५ मातरइत्यादि॥यदिमार्गशीर्षादिश्चतुर्षुमासेषुम
लमासस्तदाशुद्धमासएवाष्टकाः॥नतुमले॥भाद्र
पदापरपक्षेसप्तम्यादित्रिषुहस्सुअष्टकावत्सर्वं
कुर्यादितिवृत्तिकृत्॥ ॥इत्यन्वष्टका॥ ॥आहिता
ग्निस्तुनिमंत्रणाच्छादनांतंकृत्वादक्षिणाग्नीधनादिद
विरासादनांतंकृत्वापूर्ववद्ब्राह्मणाननुज्ञाप्यदक्षिणा
ग्राविधामुपसमाधायउदीरतामित्यादिभिरष्टाकु
तीर्हुत्वामेक्षणानुप्रहरणहोमशेषपरिवेषणादिब्रा २५

सं०सं० ह्मणविसर्जनांतमनाहिताग्निवत्कुर्यात्॥यन्मतेपिं
२६ डपितृयज्ञऔपासनेग्नौहोमस्तेषामत्रापिनत्रैवहो
तइत्युक्तंभट्टैःप्रयोगरत्ने॥ ॥सप्तम्यादिश्राद्धं॥॥
संवत्१८४२फाल्गुनकृष्णप्रतिपदामिंदुवासरेसमा
प्तः॥

२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिसप्तसंख्यासमाप्ताः॥ प॰ २६

838

27

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 10:41
,TRANSFERRED=2020/10/22 at 10:45:02
,PAGES=27
,TYPE=STD
,NAME=S0004343
,Book Name=M-838-SAPTSHANKHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection